# आधुनिकसाहित्यतत्त्वनिरूपणे हरिदाससिद्धान्तवागीश-राजेन्द्रमिश्रयोः मतविषये तुलनात्मकमेकम् अध्ययनम्

## ādhunikasāhityatattvanirūpaṇe haridāsasiddhāntavāgīśa-rājendramiśrayoḥ matavişaye tulanātmakamekam adhyayanam

**Sumanta Patra**
Research Scholar
Ramakrishna Mission Vidyamandira
Belur Math, Howrah, West Bengal, India
E-mail: sumanta.patra.vvv@gmail.com

**Abstract:** अस्मिन् शोधपत्रेऽस्माभिः हरिदाससिद्धान्तवागीशकृतस्य *काव्यकौमुदीग्रन्थस्य* च अभिराजराजेन्द्रमिश्रविरचितस्य *अभिराजयशोभूषणग्रन्थस्य* निर्दिष्टविषयाणां तुलनात्मकं समीक्षणं विहितमस्ति। तत्रादौ ग्रन्थकर्त्रोः, तयोरलङ्कारग्रन्थयोश्च सामान्यपरिचयः प्रदत्तः। ततोऽनुबन्धचतुष्टयम्, काव्यप्रयोजनम्, काव्यहेतुः, काव्यस्वरूपम्, काव्यभेद इत्यादयो विषया उपस्थापिताः। क्वचिद् हरिदासमहोदयस्य च राजेन्द्रमिश्रमहाभागस्य मतपार्थक्यम् अवलोक्यते। क्वचित् मतसाम्यमपि दरीदृश्यते। क्वचिच्च तयोः पूर्वाचार्यैः सह मतसाम्यमस्ति। अन्यत्र ताभ्याम् आधुनिकालङ्कारिकाभ्यां पूर्वाचार्याणां मतं समर्थितं, क्वचिच्च खण्डितम्। तत्सर्वमत्र समासेन सयुक्ति आलोचितम्। यथा काव्यप्रयोजनविषये यत्र मम्मटाचार्यादिभिर्यश-आदिप्रयोजनषट्कं निगद्यते तत्र हरिदासमहोदयेन केवलं 'प्रयोजनम् आनन्दः काव्यस्य' इत्युच्यते। राजेन्द्रमहाभागेन तु यश एव काव्यप्रयोजनमिति कथ्यते। काव्यभेदविषये हरिदासमहोदयेन पूर्वाचार्याणामेव मतं स्वीक्रियते परन्तु राजेन्द्रमिश्रमहाभागेन सहृदयास्वाद्य-कोविदास्वाद्य-लोकास्वाद्यभेदेन काव्यस्य त्रैविध्यमेवाङ्गीक्रियते। ताभ्याम् आचार्याभ्यां कथं काव्यप्रजोनादिविषयेषु पूर्वाचार्याणां मतानि नाङ्गीक्रियते तदपि समासेनास्माभिरुपस्थापितम्

**Keywords:** काव्यकौमुदी, अभिराजयशोभूषणम्, काव्यप्रयोजनम्, काव्यलक्षणम्, काव्यभेदः।

### उपोद्घातः

आधुनिककाव्यशास्त्रनभसि काव्यजगति च ये खलु क्रान्तदर्शिनः सुचारुकवयः स्वकाव्यमहिमभासा विविधशास्त्रज्ञानवैभवनैपुण्येन च राराज्यन्ते, तेषु मूर्धन्यभूतो वङ्गीयकविर्महामहोपाध्यायोपाधिना विभूषितश्च भारताचार्यो विद्वद्विद्यार्थिपरिषदि लब्धयशस्को हरिदाससिद्धान्तमहाभाग आसीत् अन्यतमः। तथा च बहिर्वङ्गे प्राप्तपद्मश्रीक आधुनिककालस्य

कालिदासो वाग्देवीकृपाधन्यस्त्रिवेणीकविः मिश्रोऽभिराजराजेन्द्रमहाभागो दिनमणिरिव संस्कृतसाहित्यसुरवर्त्मनि विशिष्टस्थानं बिभर्ति। सन्ति केचन रमणीयकाव्यविलेखने सिद्धहस्ता महाकवयश्चापरे केचन काव्यशास्त्रविनिर्माणे पारङ्गमाः। सरस्वत्याः द्वयोः वर्त्मनोः लब्धकीर्तयस्तु विद्वांसः सुदुर्लभा एव। अर्वाचीनकाले प्रतिभोद्भवे काव्यकर्मणि वा प्रज्ञासम्भवे काव्यशास्त्रकर्मणि हरिदासमहाभागेन अभिराजराजेन्द्रमिश्रेण च तुल्यं विद्वान् तु गजमुक्ता इव सुविरलः। एवं हरिदासमहाभागस्य काव्यशास्त्रग्रन्थस्तु *काव्यकौमुदी,* राजेन्द्रमिश्रमहोदयस्य काव्यशास्त्रीयग्रन्थः वा अलङ्कारशास्त्रं तु *अभिराजयशोभूषणम्।* एवम् आधुनिकसाहित्यतत्त्वनिरूपणप्रसङ्गे द्वयोः अलङ्कारशास्त्रयोः मध्ये क्वचित् मम्मटादीनां पूर्वाचार्याणां समर्थनं यथास्ति तथैव क्वचित् खण्डनमपि विहितम्। एवम् अर्वाचीनदृष्ट्या साहित्यतत्त्वनिरूपणे हरिदाससिद्धान्तवागीश-राजेन्द्रमिश्रयोः मतयोः एकं तुलनात्मकमध्ययनम् अधः समुपस्थाप्यते।

**हरिदाससिद्धान्तवागीशस्य *काव्यकौमुदी***

येषां पण्डितमूर्धन्यानां सुविस्तृतमनीषया वङ्गसंस्कृतिः समद्धेश्वरमसीमानम् अधिरूढा, तेषु हरिदासमहोदयस्तु अन्यतमः। काव्यकोविदोऽयम् इदानीन्तनवङ्गदेशान्तर्गतस्य फरिदपुर-मण्डलस्य कोटालिपल्ल्या ऊनशियाग्रामे षट्सप्तत्युत्तराष्टादशशततमे ईशवीयाब्दे जनिं लेभे। अस्य पिता गङ्गाधरविद्यालङ्कारो, माता च विधुमुखीदेवी आस्ताम्। अयं विद्वान् मधुसूदनसरस्वत्याः मध्यमभ्रातुः यादवानन्दन्यायाचार्यस्य कुले अजायत। तेन बहवो ग्रन्था विरचिता यथा *महाभारतनैषधीयचरिताभिज्ञानशकुन्तलादीनां* टीकाः, *रुक्मिणीहरणा*दिमहाकाव्यानि, *मेबारप्रतापादिनाटकानि* च विरचितानि आसन्। न केवलं काव्यमेव तेन निरमायि, अपि तु काव्यशास्त्रमपि तेन रचितमासीत्।

- ***काव्यकौमुदी***

एवञ्च हरिदाससिद्धान्तवागीशमहोदयेन विरचिता *काव्यकौमुदी* अलङ्कारशास्त्रेषु विशिष्टस्थानं बिभर्ति। काव्यानां कौमुदी इति षष्ठीतत्पुरुषसमासः वा काव्यानां कौमुदी इव इति उपमितकर्मधारयसमासः इति विग्रहवाक्यम्। ग्रन्थेऽस्मिन् कारिका-वृत्ति-उदाहरणभागाः विद्यन्ते। ग्रन्थोऽयं पञ्चदशकलाभिः विभक्तः। चन्द्रः खलु पञ्चदशकला अतिक्रम्य पूर्णतामेति। अर्थात् पूर्णिमामुपैति। तथैवायं ग्रन्थोऽपि पञ्चदशकलाविशिष्टोऽस्ति। अर्थात् अस्य ग्रन्थस्य विभागः कलापदेन क्रियते। एवं विभागे महान् कलेवरः अन्यत्रालङ्कारग्रन्थेषु प्रायो नैवावलोक्यते। अधः *काव्यकौमुद्या* विभागः, तत्र तत्र वर्णितविषयाणां समासेन आलोचनं प्रदश्र्यते। प्रथमकलायां काव्यस्य प्रयोजनकथनम् स्वरूपादिनिरूपणञ्च अस्ति। द्वितीयकलायां दृश्यकाव्यानां स्वरूपं निरूपितम्। तृतीयकलायां श्रव्यकाव्यनिरूपणम्। ध्वनिकाव्यानां स्वरूपनिर्णयस्तु चतुर्थीकलायाम्। पञ्चमीकलायां गुणीभूतव्यङ्ग्यकाव्यानां निरूपणम् विहितम्। अभिधादिशक्तिस्वरूपविचारस्तु षष्ठीकलायामस्ति। रसादिनिरूपणं भवति सप्तमीकलायाम्। नायक-नायिकयोः निरूपणं यथाक्रमम् अष्टमीकलायाम्, नवमीकलायां च विद्यते। दोषाणां

निरूपणं दशमीकलायाम्। एकादशीकलायां गुणनिरूपणम्। रीतिनिरूपणं द्वादशीकलायाम्। त्रयोदशीकलायां शब्दालङ्कारनिरूपणम्। चित्राद्यलङ्काराणां निरूपणं चतुर्दशीकलायाम्। तथा अन्तिमकलायाम् अर्थालङ्कारनिरूपणम् विहितम् अस्ति हरिदाससिद्धान्तवागीशमहोदयेन।

**अभिराजराजेन्द्रमिश्रमहाभागस्य *अभिराजयशोभूषणम्***

कविरसौ त्रिचत्वारिंशदधिकोनविंशशततमे ईशवीयाब्दे उत्तप्रदेशस्य जौनपुरजनपदे दुर्गाप्रसाद-अभिराजीदेव्योः सुपुत्ररूपेण जनिमलभत। शैशवे एव पितास्य दिवङ्गतः। मात्रा एव पालितस्य अस्य राजेन्द्रस्य मातृभक्तिस्तु सत्यमतुला। अस्य नाम वस्तुतो राजेन्द्रमिश्रः, किन्तु मातृभक्तिवशतो मातुर्नामतः पूर्वभागं स्वीकृत्य अभिराजराजेन्द्रमिश्रः साधितः।

आबाल्यादेव मेधावी अयं विविधविषये पारदर्शी आसीत्। पितामहेनानुप्राणितस्यास्य संस्कृतविषये प्रीतिरजायत। एवं चतुर्दशवयसि एव *विनयमञ्जरी कंग्रेसप्रगतिः* इति ग्रन्थद्वयं प्रणीतवान्। बाल्यशिक्षां समाप्य इलाहवादनगरं समागत उच्चशिक्षायै। एवं चतुष्षष्ठ्याधिकैकोनविंशशततमे ईशवीयाब्दे स्नातकोत्तरपरीक्षायां स्वर्णपदकादिकं प्राप्नोत्। एवम् अन्योक्तिविषये गवेषणाकार्यमकरोत्। ततः प्राच्यपाश्चात्त्ययोः विविधप्रदेशेष्वध्यापक-पदमलङ्कृत्यान्ते सम्पूर्णानन्दविश्वविद्यालये कुलपतिपदमभूषयत्। राजेन्द्रमिश्रमहाभागो दीर्घाध्ययनाध्यापनजीवने बहुविधकाव्यानि व्यरचयत्। प्रायेणानेन पञ्चशदधिकद्विशतं काव्यान्यलिख्यन्त। एवम् *कौमारग्रन्थस्य* च *इक्षुगन्धाग्रन्थस्य* कृते साहित्य-एकाडेमिपुरस्कारेण, *विद्योत्तमारूपकस्य* कृते कल्पवल्लीपुरस्कारेण, महाकाव्यानां कृते वाचस्पतिसम्मानेन, पद्मभूषणेन, राष्ट्रपतिपुरस्कारेण चासौ विद्वान् सुवक्ता मधुरगायको महाकविरभिराजो विभूषितः। अयं सौमित्रनन्दनपन्तमहाभागं काव्यगुरुरूपेण मन्यते स्म। काव्यस्य शाखाचतुष्टये-ऽप्ययमासीन्निष्णातः। काव्यशास्त्रस्य प्रसिद्धग्रन्थस्तावदस्य *अभिराजयशोभूषणम्* इति।

- ***अभिराजयशोभूषणम्***

आधुनिककाव्यशास्त्रेतिहासेषु *अभिराजयशोभूषणमेकं* राजेन्द्रमिश्रस्य भावयितृप्रतिभाया विशिष्टं निदर्शनम्। ग्रन्थस्यैवंविधनामकरणे किं कारणमिति चेदुच्यते यत् अभितो धरित्र्यां स्वर्गलोके च राजन्ते ये यशःकायाः कवयस्सहृदयाश्च तेऽभिराजाः। तेषां यश एव भूषणं यस्य तन्नूतनं काव्यशास्त्रम् *अभिराजयशोभूषणम्*[1] इति। *काव्यप्रकाश* इवायमपि ग्रन्थः कारिका-वृत्ति-उदाहरणभागेन विभक्तः। पूर्वाचार्याणां मतानि सश्रद्धमुद्धृत्य समुचितं स्वमतमपि यथास्थानं विवेच्य प्रदीयतेऽनेन। ग्रन्थेऽस्मिन् सप्तषष्ठ्याधिकपञ्चशतं कारिकाः सन्ति, उदारणपद्यानि प्रायः स्वकीयानि एव, कानिचन समसामयिककाव्येभ्यः सङ्गृहीतानीति विशेषः, कालोपयोगिना सहजसरलमाध्यमेन काव्यतत्त्वानां विवेचनमस्मिन् ग्रन्थे दरीदृश्यते। ग्रन्थोऽयम् इलाहबादस्य वैजन्तप्रकाशनतः षडधिकद्विसहस्रशतशते ईशवीयाब्दे प्रकाशपदमवाप।

- ***अभिराजयशोभूषणस्यानुबन्धाः***

अभिनवशास्त्रस्यास्याधिकारी तु काव्यचिकीर्षुः नवीनकविः, काव्यशास्त्रजिज्ञासुर्वा। एवं

ग्रन्थस्य विषयवस्तु अधः समासेनोपस्थाप्यते। तत्र पञ्चोन्मेषा विलसन्ति यथा-

१. **काव्यपरिचयोन्मेषः** (काव्यस्य प्रशंसा-लक्षण-हेतु-प्रयोजन-विभाजनानि पर्यालोचितानि)
२. **शरीरतत्त्वोन्मेषः**(शब्दशक्ति-वृत्ति-रीति-गुण-अलङ्काराश्चालोचिताः)
३. **आत्मतत्त्वोन्मेषः**(काव्यस्य आत्मरूपेण प्रतीयमानार्थस्य स्थापना विहिता)
४. **निर्मितितत्त्वोन्मेषः**(गद्य-पद्य-मिश्रभेदात् पद्यबन्धाः वर्णिताः)
५. **प्रकीर्णतत्त्वोन्मेषः**(गीतकाव्य-गलज्जलिका-छन्दोमुक्तादिरचनानां सलक्षणमुदाहरणानि दर्शितानि)

एवं विषयेण सह अभिनवकाव्यशास्त्रस्यास्य सम्बन्धस्तु ज्ञाप्यज्ञापकभावसम्बन्धः। ननु बहुषु *काव्यप्रकाशा*दिकाव्यशास्त्रेषु सत्सु किमस्ति प्रयोजनमस्याभिनवस्य काव्यशास्त्रस्य *अभिराजयशोभूषणस्येति* चेदुत्तरति स्वयम् अभिराजराजेन्द्रमिश्रमहाभागो यथा प्रथमं तावदिदं यत्प्रतिष्ठापिते खलु साम्प्रतिकलोकतन्त्रेऽपगते च राजतन्त्रे नृपैकमात्रकृतीनां विषये किं क्रियेत? द्वितीयञ्चापि कारणमिदं यत्संस्कृतेऽप्यधुनाऽन्यभारतीयभाषोपयुक्ता लोकप्रियाः काव्यप्रकारा निर्मीयन्ते नव्यैः कविभिः। तेषां कृते नोपलभ्यते कश्चित् काव्यशास्त्रावलम्बः। अतएव कथा-नाट्यादिसम्बद्धानां नूतनकाव्यप्रकाराणामपि नियमनिर्देशार्थं किञ्चिदभिनवकाव्यशास्त्रमपेक्षितमेव। एवं विद्वच्छिरोमणिः सन्नपि कालिदास इव विनयी महामहोपाध्यायो राजेन्द्रमिश्रः प्रयोजनान्तरमपि कथयति यथा—

‘क्व सूर्या मम्मटाद्यास्ते क्व चाहं लघुदीपकः।
तुल्यं किन्तूभयोर्लक्ष्यं शासदासौधकाशनम्॥’[2] इति।

अतः सप्रयोजनमेवेदमभिनवकाव्यशास्त्रमिति शास्त्रस्यास्यानुबन्धचतुष्टयम्।

**काव्यप्रयोजननिरूपणे हरिदास-राजेन्द्रमिश्रयोः मतसमीक्षणम्**

काव्यस्य प्रयोजन[3]विषये विविधाचार्याणां भिन्नमतानि दृश्यन्ते। तत्र भट्टमम्मटेनोक्तम्—

‘काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षयते।
सद्यःपरनिर्वृतये कान्तासम्मिततयोपदेशयुजे’॥(*काव्यप्रकाशः१*/२) इति।

अर्थात् काव्याद् यशःप्राप्तिः, व्यवहारज्ञानम्, अमङ्गलनाशः, झटिति आनन्दलाभः, कान्तातुल्यः मधुरतया उपदेशलाभः एतानि षट् प्रयोजनानि सम्भवन्ति इति।

अपरञ्च *साहित्यदर्पणे* काव्यस्य प्रयोजनं कथ्यते यथा—

‘चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥’ (*साहित्यदर्पणे,* १/२) इति।

अर्थात् काव्यात् अनायासेन विदुषां मन्दबुद्धीनाञ्च धर्म-अर्थ-काम-मोक्षलाभो भवतीति विश्वनाथस्याशयः।

मम्मटभट्ट-विश्वनाथादयः प्राचार्याः काव्यप्रयोजनविषये यश-अर्थ-व्यवहारज्ञान-अमङ्गलनाशादिकं चतुर्वर्गफलप्राप्त्यादिकञ्च वदन्ति। हरिदासमहोदयस्तथा न मन्यते।

चतुर्वर्गादिसिद्धिः काव्याद्वा दर्शनादिग्रन्थेभ्यो भवति न वेति प्रत्यक्षतया नैवावलोक्यते। स तु विचार्यविषयः। किन्तु काव्यात् आनन्दलाभस्तु सर्वजानुभवसिद्धः। तत्तु बालोऽपि जानाति। अतः काव्यप्रयोजनविषये सारमेव दर्शयति वागीशमहोदयो यथा—

**'प्रयोजनमानन्दः काव्यस्य'** (*काव्यकौमुदी*, १/१) इति।

अर्थात् काव्यस्य परमप्रयोजनं तु आनन्द एव। गौणरूपेण धर्मादिलाभ इति कथने न बाधा।

किन्तु परम्परानुपालनपरैः मिश्रभागैः काव्यप्रयोजनविषये मम्मटमतस्यासारतां प्रतिपाद्य स्वकीयमतमपि प्रस्तूयते यथा—

'न धनाय न पुण्याय व्यवहाराय नापि वा।
न च सद्यः सुखार्थाय काव्यं निर्मात्ययं कविः॥'[4] इति।

अत्र स्पष्टीभवति यत् राजेन्द्रमिश्रेण भट्टमम्मटकृतकाव्यप्रयोजनस्यासारतां प्रतिपाद्यते इति। वस्तुतः प्रयोजनं विनैव स्वभावत एव कवयः काव्यानि सृजन्ति, काव्यनिर्माणं विना प्रकृतकविः शान्तिमेव न प्राप्नोति। अतः काव्यं लिखति। तदुक्तमपि यथा—

'वस्तुतस्तस्य कर्मैतत् संस्कारोत्थं स्वभावजम्।
यदकृत्वा क्षणं यावन्नासौ शममधिगच्छति॥'[5]इति।

एवं यथा द्विरेफो गुञ्जनं विना तुष्णीं स्थातुमेव न शक्नोति तथा कविः काव्यं विना जीवितुं नार्हति। अतः काव्यं लिखति। काव्यं तु कवेः स्वभावजं जन्मजन्मान्तरस्य पुण्यसत्फलम्। लोके यदस्वाभाविकं कर्म तस्य प्रयोजनमन्विष्येत किन्तु यत्स्वाभाविकं कर्म अर्थात् निद्रा-क्षुधा-पिपासादयः इत्येतेषां प्रयोजनान्वेषणं तु काकदन्तगणना इव। कवेः स्वभावस्तु काव्यरचना, अतस्तत्र प्रयोजनचिन्तनं व्यर्थमेव। तथापि विद्वद्भिर्यदि तदीष्यते चेत् काव्यप्रयोजनं केवलं यशः एव स्वीक्रियताम्। तदुक्तं यथा—

'पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।
परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते॥'[6]इति।

एवमभिराजराजेन्द्रमिश्रमहाभागस्य नये तु काव्यस्य परमं फलं केवलं यशः कीर्तिर्वा।

**काव्यहेतुनिरूपणे हरिदास-राजेन्द्रमिश्रयोः मतवैशिष्ट्यम्**

काव्यहेतुनिरूपणप्रसङ्गे हरिदासमहाभागस्तु पूर्वाचार्याणामेव मतमङ्गीकरोति।

परन्तु त्रिवेणीकवी राजेन्द्रमिश्रमहोदयस्तदीयेऽ*भिराजयशोभूषणे* काव्यप्रयोजनं समालोच्य काव्यहेतुं विवेचयति। तत्रापि पूर्वाचार्याणां मतानि सश्रद्धं संस्मृत्य स्वकीयं मतमपि प्रददाति। काव्यहेतुविषये प्रायः पक्षत्रयं श्रूयते। यथा दण्डि-रुद्रट-मम्मटादिभिः काव्यकारणत्वेन प्रतिभा-शास्त्रज्ञान-काव्याभ्यासाः अङ्गीक्रियन्ते। तत्र भट्टमम्मटाचार्येण कथितं यथा—

'शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुभवे॥'[7] इति।

अन्यच्च भामह-राजशेखर-कुन्तक-महिमभट्ट-जगन्नाथ-जयदेवादिभिः काव्यकारणत्वेन केवलं प्रतिभा स्वीक्रियते। तत्र जयदेवो भणति यथा—

'प्रतिभैव श्रुताभ्याससहिता कवितां प्रति।
हेतुर्मृदम्बुसम्बद्धबीजोत्पत्तिर्लतामिव॥'[8]इति।

अपरञ्च वामनेन हेतुषट्कं गृह्यते। तत्रोक्तिस्तस्य यथा तत्र काव्यपरिचयो लक्ष्यत्वम्। काव्यबन्धोद्यमोऽभियोगः। काव्योपदेशगुरुशुश्रूषणं वृद्धसेवा। पदाधानोद्धरणमवेक्षणम्। कवित्वबीजं प्रतिभानम्। चित्तैकाग्र्यमवधानम्। तद्देशकालाभ्यामिति।

वस्तुतः काव्यं तु कस्यचित् कदाचित् प्रतिभात एव जायते। अर्थात् कवित्वबीजं तु प्रतिभानमेव। प्रतिभैव च कवीनां काव्यकारणकारणम्। वस्तुतः काव्यकारणहेतुः द्विविध इति ग्राह्यम्। लौकिकोऽलौकिकश्चेति। तत्रालौकिकहेतुर्दैवायत्तः। स हेतुरेव शक्ति-प्रज्ञा-प्रतिभा-प्रभृतिपदवाच्यः। आचार्यः आनन्दवर्धनः प्रतिभां दैवायत्तामेव मन्यते। द्वितीयो लौकिकहेतुः। स तु व्युत्पत्त्यभ्यासयुगलसमन्वितः प्रयत्नसाध्यः। एतौ द्वौ पुनः प्रतिभाया एव संस्कारकौ, न तु काव्यहेतू स्वतन्त्ररूपेणेति। अनयोरभावेऽपि लोकोत्तरचमत्कारकारि काव्यं प्रतिभामात्रबलेन समुद्भवितुं शक्यते। किन्तु प्रतिभां विना काव्यं न प्रसरेत्, प्रसृतं वोपहसनीयतां यायात्।

अतः काव्यहेतुविषये मिश्रमहाभागस्तु आनन्दवर्धनादेर्मार्गमेवानुसरति। अतस्तन्मते काव्यकारणं केवला प्रतिभा। वस्तुतः कविः काव्यं न लिखति, काव्यदेवी भारती एव कविना काव्यं लेखयति। कविस्तु यन्त्रस्वरूपको निमित्तमात्रम्। यन्त्रिणी तु वाग्देवी स्वयम्। तदुक्तमपि—

'नाहं करोमि कवितामिह शारदैव
सात्मानमञ्जयति मत्कवनच्छलेन।
गन्धं तनोति जलजं न निजप्रभावाद्
विस्फूर्जितं सकलमेव तदर्कलक्ष्याः॥'[9] इति।

**काव्यलक्षणनिरूपणे हरिदास-राजेन्द्रमिश्रयोः मतसमीक्षणम्**

काव्यस्वरूपविषये हरिदाससिद्धान्तवागीशः पूर्वाचार्याणां मतेषु असारतां दर्शयित्वा ततः स्वमतं प्रस्तौति प्रथमकलायां यथा—

'मनोहारिणौ शब्दार्थौ काव्यम्'[10]इति

अत्र शब्दपदेन क्रियापदमपि आक्षिप्यते इति मनोहारिशब्दार्थघटितं वाक्यमेव काव्यमिति काव्यलक्षणम्। मनोहारित्वञ्च रसमाधुर्येण अलङ्कारसौन्दर्येण भाववैचित्र्यादिना रसिकानां सहृदयाणां हृदयाह्लादकत्वमिति। एवं श्रोत्रियजरन्मीमांसकादीनाञ्च रसिकत्वाभावात् तदाह्लादकत्वाभावेऽपि न हानिः इति भावः। एवं वैचित्र्याभावात् मनोहारिशब्दार्थाभावाद्वा काव्यत्वं न सिध्यति।

राजेन्द्रमिश्रमहाभागस्य मते काव्यलक्षणं विचार्यते इदानीम्। अस्ति काव्यलक्षणप्रसङ्गे काव्यशास्त्रकृतां वैमत्यम्। केचन शब्दार्थवादिनः, अपरे केचन शब्दवादिनः। आभामहान्मम्मटं

यावत् सर्वे आचार्याः शब्दार्थवादिनः। महामहिमपण्डितराजस्तु शब्दवादी। आधुनिककाव्यशास्त्रकारोऽभिराजराजेन्द्रमिश्रमहाभागस्तु काव्यलक्षणप्रसङ्गे मम्मटपन्थानमवलम्बते। तेन काव्यलक्षणमुक्तं यथा—

'काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजमम्।
परत्रेह च निर्व्याजं यशोऽवाप्तिप्रयोजनम्।।
शब्दार्थसङ्गमेनैव किञ्चिदाख्यातुमिष्यते।
ततश्चोभयसाहित्यं काव्यपर्यायगोचरम्।।'[11]इति।

अर्थात् स्वभावजं रसगर्भं लोकोत्तराख्यानं काव्यं भवतीति सरलार्थः। काव्यं स्वभावजं स्यात्, नाम प्रबलप्रयाससाध्यं न स्यात्, स्वाभाविकतया कवेरल्पप्रयासेनैव निष्पन्नं स्यात्काव्यम्, अर्थात् काव्यं तावद्विमृश्य विमृश्य ध्यायं ध्यायं शास्त्रमिव सायासं न लिख्यते। काव्यं रसगर्भं स्यात्, नाम काव्यं रसप्रधानम् अर्थात् सरसं स्यात्। काव्यं लोकोत्तराख्यानं स्यात्, अर्थात् लोकोत्तरस्य आख्यानम् स्यात्, लोकोत्तरत्वं नाम चमत्कारत्वम्, तस्य आख्यानं नाम आख्यायते शब्दार्थसमष्ट्येत्याख्यानम्। अनेनाभामहान्मम्मटं यावच्छब्दार्थयोः काव्यत्वाङ्गीकरणस्याविच्छिन्नपरम्पराया अनुमोदनम्। अन्यच्च रमणीयार्थप्रतिपादनपरस्यापि शब्दस्याङ्गीकारे शब्दार्थौ एव काव्यमिति स्फुटं भवति। एवञ्च काव्यलक्षणप्रसङ्गे पुनरपि कथितम्—

'सगुणत्वमदोषत्वं निष्प्रयत्नाप्यलङ्कृतिः।
प्रज्ञा चापि नवोन्मेषा लोकोत्तरत्वकारणम्॥'[12] इति।

साम्प्रतं काव्यस्य लोकोत्तरत्वे कारणं विवृणोति ग्रन्थकारो यथा सगुणत्वं रसाभिव्यञ्जकानां माधुर्यादिगुणानां साहचर्यम्। अदोषत्वं पदवाक्यरसादिदोषाणां मुख्यार्थहतिपर्यवसितानामभावः। निष्प्रयत्ना प्रयत्नरहिता स्वाभाविकी वालङ्कृतिः। नवोन्मेषा नित्यस्फुरणा प्रज्ञा प्रतिभा। एतत्सर्वं सम्भूय काव्यलोकोत्तरत्वकारणम् इति।

काव्यप्रकाशकारस्य मम्मटभट्टस्य मतेन सार्धमभिराजराजेन्द्रमिश्रमहाभागस्य मतसाम्यं दृश्यते। मम्मटेन काव्यलक्षणप्रसङ्गे कथितं यत्— 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि' इति।

एवं न केवलं शब्दः काव्यपदवीमाप्नोति नो वा अर्थः। तर्हि किं काव्यमिति जिज्ञासायामुच्यते यत् स्वभावजं रसगर्भं लोकोत्तराख्यानमेव काव्यमिति। अत्र रसगर्भपदेन वाक्यं रसात्मकं काव्यमिति कविराजविश्वनाथमतस्यानुमोदनम्। लोकोत्तरपदेन पण्डितराजजगन्नाथमन्तव्यस्यानुमोदनम्। एवं काव्यलक्षणकथनात्परमुदाहरणपद्यमप्युद्धरति समसामयिककवेः बटुकनाथशास्त्रिणः काव्याद् यथा—

'चलद्रुचिरहंसका परमहंससंसेविता
जडप्रकृतिधारिणी सकलजाड्यविध्वंसिनी।
पतन्त्यथ विहायसः शुभमतीन् नयन्ती दिवं

स्वतन्त्रगुणगौरवा जयति जह्नुराजात्मजा॥'[13]इति।

**काव्यभेदनिरूपणे हरिदास-राजेन्द्रमिश्रयोः मतसमीक्षणम्**

काव्यभेदनिरूपणप्रसङ्गे हरिदाससिद्धान्तवागीशमहोदयः पूर्वाचार्याणां मतानि एव स्वीकरोति। तेन काव्यमादौ द्विधा विभक्तम् यथा दृश्यकाव्यम्, श्रव्यकाव्यञ्च। तयोश्च वर्णनम् द्वितीयकलायाम्, तृतीयकलायां ञ विहितम्। एवं चतुर्थीकलायां पञ्चमीकलायाम् तेन यथाक्रममं ध्वनिकाव्यस्य गुणीभूतध्वनिकाव्यस्य च वर्णनम् कृतम् अस्ति।

किन्तु राजेन्द्रमिश्रमहाभागस्तु प्रचीनकाव्यभेदपरम्परायां दोषं पश्यति। अतस्तेन नूतनः कश्चन पन्थाः अनुस्रियते। यथा इदानीं राजेन्द्रमिश्रमहाभागस्य मते काव्यभेदप्रकरणमालोच्यते। दृष्टमस्त्यस्माभिर्यदाचार्यैः काव्यं प्रायेणोत्तम-मध्यम-अधमभेदेन त्रिधा विभक्तम्। तत्र व्यङ्ग्यार्थप्रधानं काव्यं भवत्युत्तमकाव्यम्। गुणीभूतव्यङ्ग्यार्थप्रधानं काव्यं भवति मध्यमकाव्यम्। एवं स्फुटव्यङ्ग्यार्थरहितं काव्यं भवत्यधमकाव्यमिति। एवंविधभेदप्रपञ्चे मानदण्डस्तु व्यङ्ग्यार्थ एव। किन्त्वभिराजराजेन्द्रमहाभागैः काव्यभेदप्रपञ्चे किञ्चिद्भिन्नं चिन्तितमस्ति। तन्मतेन काव्यभेदे मानदण्डस्तु काव्यपाठक एव।

तन्मते काव्यं त्रिधा भवति यथा सहृयस्वाद्यम्, कोविदस्वाद्यम्(पण्डितास्वाद्यम्), लोकास्वाद्यमिति। उक्तञ्च तेन यथा—

'काव्यं सहृदयास्वाद्यं कोविदास्वाद्यमेव च।
लोकास्वाद्यमिति ख्यातं त्रिविधं रोचते मम॥'[14] इति।

ननु परम्परयागतं काव्यभेदं व्यतिरिच्य कथं नूतनं पन्थानमाश्रयति प्रकृतग्रन्थकारः? ग्रन्थकृदैवोक्तं यत् काव्यं खलु काव्यदेव्याः सरस्वत्याः आशीर्वादस्वरूपम्, अंशभूतश्चेति। वाग्देव्याः आशीर्वादभूतस्य काव्यस्य कथं वा सम्भवत्यधमत्वं मध्यमत्वं वेति। एवमनर्थकल्पनेन काव्यवाङ्मयस्य तु नूनं गौरवहानिरेव भवति। एवं काव्यं सदपि व्यहरणं किमपि यदि मध्यमाध्यमसंज्ञं तर्हि पामरालपनमेव वरं न पुनः काव्यम्। काव्यीभवदेव वचः प्रसरणमुत्तमं जायते। तदुक्तं यथा—

'सृष्टिस्सारस्वती पूता प्रोच्यते यदि वाऽधमा।
मध्यमा चेति तन्मन्ये वाङ्मयं गौरवं हतम्॥'[15]इति।

एवमधस्त्रिविधकाव्यानां सोदाहरणं निरूपणं क्रियते—

- **सहृदयस्वाद्यकाव्यम्**

वस्तुतस्तु काव्यस्य त्रैविध्येऽस्मिन् क्रमवतां सहृदयकोविदलोकानां प्राधान्यमेव निर्णायकं तत्त्वम्। अत्रैतदपि चिन्त्यं यद् ये सहृदयास्ते न कोविदा इति न। वा ये कोविदास्ते न सहृदया इत्यपि न। वस्तुतः कोविदत्वे सत्यपि सहृदयत्वं यस्मिन् प्राधान्येन तिष्ठति स सहृदयः, तैः आस्वाद्यं काव्यं तूत्तमकोटिकं सहृदयस्वाद्यमित्युच्यते। तदुदाहरणं यथा वेङ्कटरामराघवस्य—

'वृन्ते यान्ति पिपीलिकाः कतिपया रोहावरोहश्रमं

कीटाः केचन मूढमेव च दले स्वापं समातन्वते।
केऽप्यन्ते शलभा विधूय वदनैस्ताम्यन्ति किञ्जलककान्
एकः केवलमेव सून! मधुपो लेढि त्वदीयं मधु॥'[16]इति।

अर्थात् अत्र गुणग्रहणशीलस्य विवेकिनः कस्यचित् महापुरुषस्य प्रस्तुतभूतस्य वर्णना कविना प्रस्तूयते व्यञ्जनामुखेन। अप्रस्तुतभूतो मधुकरो वाच्यमुखेनात्रोपस्थापितः। तेन प्रस्तुतभूतस्य महापुरुषस्य वर्णनायाः प्राधान्यम्, तच्च केवलसहृदहृदयसंवेद्यम्। एवञ्च पद्येऽस्मिन् राजतेऽन्योक्तिर्वा प्रतीयमानार्थः। अतोऽयं सहृदयस्वाद्यकाव्यमित्युच्यते।

- **कोविदास्वाद्यकाव्यम्**

एवं सहृदयत्वापेक्षया यस्मिन् कोविदत्वस्यैव प्राधान्यं दृश्यते ते कोविदाः, तैश्चास्वाद्यं काव्यं कोविदास्वाद्यम्। यथा राजेन्द्रमिश्राणामेव—

'धत्ते यो वारिधारां तमिह सविनयं मन्महे भोजमेघं
धत्ते यो वाऽरिधारां तमिह सविनयं मन्महे भोजभूपम्।
धत्तेऽयोवारिधारां तमिह सविनयं मन्महे भोजखड्गम्
धत्ते यो वा रिधारां तमिह सविनयं मन्महे भोजदेशम्॥'[17] इति।

अत्र वारिधारां दधतो भोजमेघस्य, अरिधारां शत्रुसैन्यं विदलतो भोजभूपस्य, अयोवारिधारां दधतो भोजखड्गस्य, रिधारां च दधतो भोजदेशस्य परिकल्पनया सभङ्गाभङ्गश्लेषमहिम्ना च जायत एव कश्चित्कोविदानन्दविषयः।

- **लोकास्वाद्यकाव्यम्**

एवं सहृदयत्वकोविदत्वपरिपाकवञ्चितैः सामान्यमनीषैः लोकैरास्वाद्यं काव्यं लोकास्वाद्यमिति कथ्यते। यथा—

'धम्मिल्लं स्वं घनवनगतं सस्मितं धुन्वती सा
स्कन्धे धृत्वा हरितहरितं शाद्वलानां दुकूलम्।
प्रातःकाले जलधिजपयश्शुल्लके स्वे प्रगृह्य
माताऽऽयाता तनयवदनक्षालनार्थं समीपम्॥'[18]इति।

पद्येऽस्मिन् सान्द्रकाननहरितदूर्वातलिच्छकमण्डितायाः सागरजलपरीतायाः शार्मण्यधरित्र्या लोकोत्तरवर्णनं समेषामेव सामाजिकानां प्रतिभाऽप्रतिभाजुषां पाण्डित्याऽपाण्डित्यसमुल्लसितानां हृदयं प्रसह्य बध्नातीति लोकास्वाद्यमिदं काव्यमिति राजेन्द्रमिश्रः।

एवं सोदाहरणम् अभिराजराजेन्द्रमिश्रमहाभागैः काव्यभेदान् प्रदर्शयति। अनेनैव क्रमेण परिचयोन्मेषस्य समाप्तिर्जायते।

**शोधकार्यस्यास्य प्रयोजनम्**

शोधकार्यस्यास्य प्रधानं प्रयोजनम् तावत् सम्प्रदायरक्षणम्। ननु हरिदाससिद्धान्तवागीशस्य

*काव्यकौमुदीग्रन्थस्य* आधुनिकसाहित्यशास्त्रे वङ्गप्रदेशे यद्यपि प्रसिद्धा अस्ति, तथापि बहिर्वङ्गे तथा प्रसारो नास्ति। तथैव *अभिराजयशोभूषणस्य* प्रसारः वङ्गदेशे तथा नास्ति। अनेन शोधकार्येण *काव्यकौमुदी-अभिराजयशोभूषणयोः* तुलनात्मकाध्ययनेन ग्रन्थद्वयस्योभयभागे प्रचारः प्रसारश्च स्यादिति आशासे। तेन आधुनकिसंस्कृतकवीनां काव्यनिर्माणे कश्चन मानदण्डः प्रतिष्ठितो भविष्यति।

वस्तुतः मम्मटादीनाम् आचार्याणां *काव्यप्रकाशादिग्रन्थाः* बहुप्राचीनकाले एव रचिताः। तदा समाजे आसीत् राजतन्त्रः। अधुना तु लोकतन्त्रः। साहित्यं वा काव्यं खलु समाजस्य दर्पणः इव। समाजे यद्भवति, तत्प्रतिफलति काव्येषु अपि। राजतन्त्रकालीनाः काव्यिकनियमाः लोकतन्त्रेऽपि यदि समानरूपेण अनुस्त्रियन्ते तर्हि काव्यस्य प्रयोजनादिविषये मतपार्थक्यं स्यादिति। यथा काव्याद् अर्थलाभे धावकादीनां वर्णना प्राप्यते। किन्तु आधुना तु राजा एव नास्ति। तर्हि राज्ञः धनलाभः कथं स्यादिति तु चिन्त्यम्। एवं यथा सामाजिकव्यवस्था परिवर्तते तथैव काव्यिकनियमाः अपि परिवर्तनीयाः। अतः आधुनिककाव्यशास्त्राणि अपि आलोचनीयानि। अतः आधुनिककाव्यशास्त्रेषु शोधकार्यं तेषां प्रचारः प्रसारः च कर्तव्यः। एवं हि सत्सु *काव्यप्रकाश-साहित्यदर्पणादिषु* काव्यशास्त्रेषु नूनतकाव्यशास्त्रस्य प्रयोजनविषये उक्तं यत्— प्रथमं तावदिदं यत्प्रतिष्ठापिते खलु साम्प्रतिकलोकतन्त्रेऽपगते च राजतन्त्रे नृपैकमात्रकृतीनां विषये किं क्रियेत? द्वितीयञ्चापि कारणमिदं यत्संस्कृतेऽप्यधुनाऽन्यभारतीयभाषोपयुक्ता लोकप्रियाः काव्यप्रकारा निर्मीयन्ते नव्यैः कविभिः। तेषां कृते नोपलभ्यते कश्चित् काव्यशास्त्रावलम्बः। अतएव कथा-नाट्यादिसम्बद्धानां नूतनकाव्यप्रकाराणामपि नियमनिर्देशार्थं किञ्चिदभिनवकाव्यशास्त्रमपेक्षितमेव। तस्मात् एवं नूतनकाव्यशास्त्रविषये शोधकार्यमपि करणीयम्।

एवं शोधगङ्गादिषु अन्विष्टं मया। तत्र हरिदाससिद्धान्तवागीकृतस्य *काव्यकौमुदीग्रन्थस्य* अभिराजराजेन्द्रमिश्रकृतेन *अभिराजयशोभूषणग्रन्थेन* सह तुलनात्मकम् शोधकार्यम् अधुनापि न जातमिति। अतः विषयोऽयं मया चितः इति शिवम्।

## Endnotes

1. *अभिराजयशोभूषणम्,* परिचयोन्मेषः, पृष्ठा-१२।
2. प्रागेव,नान्दीमुखे,पृष्ठा-८।
3. *प्रयोजनम् अनुदिश्य मन्दोऽपि न प्रवर्तते इति नयेन लोकस्य सर्वाणि अपि कर्माणि सप्रयोजनानि भवन्ति।*
4. *अभिराजयशोभूषणम्,* प्रथमोन्मेषः, पृष्ठा-२८।
5. तत्रैव।
6. तत्रैव।
7. *काव्यप्रकाशः,* प्रथमोल्लासः, पृष्ठा-११।
8. *चन्द्रालोकः,* प्रथममयूखः, षष्ठं पद्यम्।

9. *अभिराजयशोभूषणम्,* प्रथमोन्मेषः, पृष्ठा-३७।
10. *काव्यकौमुदी,* प्रथमाकला,पृष्ठा-३
11. प्रागेव, पृष्ठा- ३८।
12. तत्रैव।
13. तत्रैव, पृष्ठा-४२।
14. तत्रैव, पृष्ठा- ५०।
15. तत्रैव, पृष्ठा- ५१।
16. तत्रैव, पृष्ठा- ५२।
17. तत्रैव, पृष्ठा- ५४।
18. तत्रैव, पृष्ठा- ५७।

## Bibliography


- आचार्यमम्मटभट्टः. *काव्यप्रकाशः.* सम्पा. आचार्यरामानन्दः, संस्कृतपुस्तकभाण्डार, प्रथमप्रकाशः वैशाखः १३८४ वङ्गाब्दे.
- आचार्यविश्वनाथः. *साहित्यदर्पणः.* सम्पा. कृष्णमोहनशास्त्री, चौखम्बा संस्कृतसंस्थान, संस्करण २०१२.
- आचार्यानन्दवर्धनः. *ध्वन्यालोकः.* सम्पा. सत्यनारायणचक्रवर्ती, संस्कृतपुस्तकभाण्डार, पुनर्मुद्रण आगस्ट २०२१.
- कविराजराजशेखरः. *काव्यमीमांसा.* सम्पा. नगेन्द्रनाथचक्रवर्ती, शान्तिनिकेतन, विश्वभारती, १९६०.
- गोविन्दठक्कुरः. *काव्यप्रदीपः.* चोखम्बा, पुनर्मुद्रण १९८२.
- दाधीचः, डाँ. रामकुमारः. *अलङ्कारशास्त्रेतिहासः.* हंसा प्रकाशन, संस्करण २०१९.
- पण्डितराजजगन्नाथः. *रसगङ्गाधरः.* विद्युत्-वरणघोषः, पश्चिमवङ्गराज्यपुस्तकपर्षत्, २०१९.
- पीयूषवर्षश्रीजयदेवः. *चन्द्रालोकः.* चौखम्बा संस्कृतसीरीज आफिस, १९६०.
- भट्टमम्मटः. *काव्यप्रकाशः.* भट्टवामनाचार्यः, परिमलपब्लिकेशन्स,२०२२.
- भट्टाचार्य, विष्णुपद. *साहित्यमीमांसा.* विश्वभारती ग्रन्थनविभाग, १३८२.
- महाकविभट्टिः. *भट्टिकाव्यम्.* वासुदेवशर्मा, निर्णयसागरा, १९३४.
- मिश्रः, अभिराजराजेन्द्रः. *अभिराजयशोभूषणम्.* वैजन्तप्रकाशनम्, २००६.
- मुखोपाध्यायः, अञ्जलिका. *नाट्यशास्त्रम्.* संस्कृतपुस्तकभाण्डारः, १०१८.
- वन्द्योपाध्याय, श्रीसत्यरञ्जन. *संस्कृत अलङ्कार साहित्ये समालोचनार धारा.* संस्कृत बुक डिपो, २०१३.
- शर्मा, श्रीरामजीलाल. *काव्यप्रकाशरहस्यम्.* चौखम्बा सुरभारती प्रकाशन, संस्करण २०२१.
- सेनः, शुभ्रजित. *भारतवर्षे आधुनिकसंस्कृतसाहित्यम् विहङ्गमदृष्ट्या परिशीलनम्.* सस्कृतपुस्तकभाण्डारः,२०१९.
- हरिदाससिद्धान्तवागीशः. *काव्यकौमुदी.* संस्कृतसाहित्यपरिषद्, प्रकाशकालः १३६५ तमे वङ्गाब्दे.


——